प्रारम्भ
START

Short Title Mahākālayogaśāstra

NEPAL-GERMAN MANUSCRIPT PRESERVATION PROJECT

National Archives, Kathmandu, Nepal.

Manuscript No. 5-6568 विषय नं. Śaivatantra 1025 kha

Catalogue (60 बृहद् संक्षिप्त सूचिपत्रम्) vol. No.

TITLE:

Mahākālayogaśāstra

No. of leaves: 18 Size in cm: 32x13

Date of filming: 14.11.71

Remarks: paper, devanāg

Reel No. A 207/9

खेचर १ ॐ नमः श्रीगणेशाय नमः ॐ नमः शिवाय. अथ देवीं प्रवक्ष्यामि विद्यां खेचरीसंज्ञितां॥ यया विज्ञानमात्रेणात्रै
ल्लोक्येस्मिन्नजरामरः ॥१॥ मृत्युव्याधिजराग्रस्तं दृष्ट्वा विश्वमिमं प्रिये ॥ बुद्धिं दृढतरां कृत्वा खेचरीं तु समाश्रयेत् ॥
२॥ जरामृत्युपरघ्नीं या खेचरीं वेत्ति भूतले ॥ ग्रन्थतश्चार्थतश्चैव तदभ्यासप्रयोगतः ॥३॥ तं सर्वभावेन गुरुं मत्वा
तं च समाश्रयेत् ॥ दुर्लभा खेचरी मुद्रा तन्मेद्वासाश्च दुर्लभा ॥४॥ अभ्यासमेलनं चैव युगपन्नैव सिध्यति ॥अ
भ्यासमात्रनिरतो न विन्दतीह मेलकम् ॥५॥ अभ्यासं लभते देवीं जन्मजन्मान्तरे क्वचित् ॥ मेलकं लभते देवी यो
गेजन्मान्तरे क्वचित् ॥६॥ यदा तु मेलकं कामी लभते परमेश्वरीम् ॥ तदा तत्सिद्धिमाप्नोति यदुक्तं शास्त्रसंततौ ॥७
ग्रन्थतश्चार्थतश्चैव मेलकं लभते यदा ॥ तदा शिवत्वमाप्नोति निर्मुक्तः संसृतिप्रजात् ॥८॥ शास्त्रं विनासमस्तावोद्धुं
गुरवोपि न शक्नुयुः ॥ तस्मात्सु दुर्लभतरं लभ्यं शास्त्रमिदं प्रिये ॥९॥ यावन्न लभ्यते ग्रन्थं तावद्गां पर्यटेद् दिशाम् ॥ यदा राम १
संलभ्यते शास्त्रं तदा सिद्धिः करे स्थिता ॥१०॥ न शास्त्रेण विना सिद्धिर्दृष्टा पि जगत्त्रयम् ॥ तस्मान्मेलकदातारं शा

स्त्रदातारमीश्वरीम् ॥११॥ तदभ्यासप्रदातारं शिवं मत्वा सदा जपेत् ॥ सन्त्यश्च बहवो देवि मया प्रोक्ताः पुराश्चिते
॥१२॥ न तेषु खेचरीसिद्धिराख्याता मृत्युनाशिनी ॥ महाकालं च मार्तण्डं विवेकाख्यं च शोभनम् ॥१३॥ विशुद्धे
श्वरसंज्ञं च तथा वै जालसम्बरं ॥ एतेषु मन्त्रचर्येषु तदभ्यासः प्रकाशितः ॥१४॥ क्वचित्स्पष्टं तथास्पष्टं क्वचित्मे
लकाधिकम् ॥ अस्मिन्मन्त्रवरे दिव्ये मेलकादि प्रकाशितं ॥१५॥ यदि तत्र भवेत्किञ्चिद्दुर्ज्ञेयं खेचरीमतं ॥ तत्तत्स
र्वमिहास्माभिरल्पवर्णैस्तत्प्रकाशितं ॥१६॥ तदशास्त्रं प्रलभेत यथोक्तं विधिवद्भुतम् ॥ मत्सुखावुरुहा ज्ञातं तथाशा
स्त्रमिदं च वेत्ति ॥१७॥ सचैव हि गुरुः सत्यमर्यतो चेत्तियः पुनः ॥ न वा धिकं समाख्यातो गुरुस्तोत्तिलतो धिकः ॥१८॥ ल
ब्ध्वा शास्त्रमिदं गुह्यमन्येषां न प्रकाशयेत् ॥ सुविचार्य प्रवक्तव्यमेकं मार्गोपजीविनम् ॥१९॥ यइदं परमं शास्त्रं यत्र
तत्र प्रकाशयेत् ॥ सशीघ्रं भक्ष्यते देवि योगिनीभिः शिवाज्ञया ॥२०॥ ग्रन्थं समर्पयेद्यस्य विना कौलिकतर्पणात् ॥ पू
जितं शुभवस्त्रस्य दिव्यधूपसुधूपितम् ॥२१॥ श्रावयेद् द्विजनस्थाने योगिने योगशालिने ॥ यस्मिन्नपूजितं शास्त्रमिदं

निश्शब्दे गृहे ॥२२॥ तत्राग्निरुग्रहारान्निपीडा भवति निश्चितम् ॥ यत्रेदं पूजितं ग्रन्थं गृहे तिष्ठति पार्वती ॥२३॥ तत्र स
र्वार्थदायिन्यो वसन्ति कुलदेवताः ॥ तस्मात्सर्वप्रयत्नेन गोपनीयं विजानता ॥२४॥ तस्मिन्योगी मयोक्तानि सं सिद्धिं न ते
समीहते ॥ स योगी सर्वभावेन गोपयेत्पुस्तकं त्विदम् ॥२५॥ अहं तस्य गुरुर्देवी यत्रास्ते पुस्तकं स्वयम् ॥ गुणागुणांस
हेशानि पुस्तकस्यानुरक्षणे ॥२६॥ तत्प्रकटञ्च मया प्रोक्तमिदानीं खेचरीं शृणु ॥ यत्रास्ते चागुरुर्देवी दिव्ययोग
प्रसाधकः ॥२७॥ तत्र गत्वा च तेनोक्तं संप्रदाय त्र यत्नतः ॥ सम्यगभ्यासयत्नेन कुर्या देता अतन्द्रितः ॥२८॥ वि
द्यां च खेचरीं देवि प्रवक्ष्ये मरणासिद्धिदाम् ॥ तत्तया रहितो योगी खेचरीसिद्धिभाग्भवेत् ॥२९॥ खेचर्या खेचरीं योज्या
खेचरीबीजपूरया ॥ खेचराधिपतिर्भूत्वा खेचरेषु सदा वसेत् ॥३०॥ खेचरावसथं वह्निं सर्वामराडलभूषितम् ॥ व्या
ख्यातं खेचरीबीजं तेन योगी स सिध्यति ॥३१॥ सोमेशान्नवमं वर्णं प्रतिलोमेन चोद्धरेत् ॥ तस्मात्त्रिंशांक्षरं वा स्या
मक्षरं चन्द्ररूपकम् ॥३२॥ तस्मादधामवर्णञ्च विलोमं परमं प्रिये ॥ तस्मात्परममित्युक्तं वदादिरपि पञ्चमः ॥३३

इन्द्रोपि विन्दुसंभिन्नं कूटोयं परिकीर्तितः ॥ गुरूपदेशलभ्यञ्च सर्वलोकप्रसिद्धिदम् ॥३४॥ यातस्य देवयासायाः
तद्रूपकरणाश्रयः ॥ स्वप्नेपि न भवेत्तस्य नित्यं द्वादशजाप्यतः ॥३५॥ य इमां पञ्च लक्षाणि जपेदपि स्वयन्त्रितः
तस्यास्ति खेचरीसिद्धिः स्वयमेव प्रवर्तते ॥३६॥ नश्यन्ति सर्वविघ्नानि प्रसीदन्ते च देवता ॥ वलीपलितनाशश्च भवि
ष्यति न संशयः ॥३७॥ एवं लब्ध्वा महाविद्यामभ्यासं कारयेत्ततः ॥ अन्यथा क्लिश्यते देवि न सिद्धिः खेचरीं विना ॥३८॥
यथाभ्यासविधौ विद्यां नालभेयस्तथा मयी ॥ ततः संमेलकादौ च लब्ध्वा विद्यां समुज्जयेत् ॥३९॥ अनयारहितो
देवि न कश्चित्सिद्धिभाग्भवेत् ॥ यदैव लभते शास्त्रं तदा विद्यां समाश्रयेत् ॥४०॥ ततस्तत्रोदितां सिद्धिमयुतां लभ
ते प्रिये ॥ तालुमूले समुद्धृत्ये सप्तवासरमात्मवित् ॥४१॥ सुगुरूक्तप्रकारेण मलं सर्वं विशोधयेत् ॥ स्नुहीपत्रनिभं
सर्वं सुतीक्ष्णं स्निग्धनिर्मलम् ॥४२ समादाय ततस्तेन रोममात्रं समुच्छिनेत् ॥ हित्वा सैन्धवपथ्याभ्यां चूर्णिताभ्यां
प्रदर्शयेत् ॥४३॥ पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥ एवं क्रमेण षण्मासं नित्यं संदर्शनात्प्रिये ॥४४॥ षण्मा

सादसनामूलं शिरावन्धं प्रमथयति ॥ अथवागीश्वरीधाम्ना शिरोवस्त्रेणावेष्टयेत् ॥४५॥ शनैरुत्कर्षयेद्योगी कालवेलावि
धानवित् ॥ पुनः षण्मासमात्रेण नित्यं संदर्शनात्प्रिये ॥४६॥ भ्रूमध्यावधि चाभ्येति तिर्यक्कर्णबिलावधि ॥ अधस्ता
च्चिबुके मूलं पूजा निक्रमकारिता ॥४७॥ पुनः संवत्सराणां तु तृतीयादिवलीलया ॥ केशान्तमूर्ध्वं क्रामन्ति तिर्यक्शंख
वावधि ॥४८॥ अधस्तात्कण्ठकूपान्तं पुनर्वर्षत्रयेण तु ॥ ब्रह्मरन्ध्रान्तमावृत्य तिष्ठत्यमरवन्दिते ॥४९॥ तिर्यक्चूलि
तलं याति अथ कर्णबिलावधि ॥ शनैः शनैर्मस्तकाच्च महावज्रकपाटभित् ॥५०॥ पूर्वं बीजान्विता विद्या विख्याता
तिसुदुर्लभा ॥ तस्याः षडङ्गं प्रकुर्वीत तया षट्स्वरभिन्नया ॥५१॥ कुर्यादेवं यथान्यायं सर्वसिद्ध्यै प्रिये तव ॥ शनैरियं
प्रकर्तव्यमभ्यासं युगपन्नहि ॥५२॥ युगपद्यस्य तेन तस्य शरीरं विलयं व्रजेत् ॥ तस्माच्छनैः शनैः कार्यमभ्यासं वरवर्णि
नि ॥५३॥ यदा च बाह्यमार्गेण जिह्वा ब्रह्मबिलं व्रजेत् ॥ तदा ब्रह्मार्गलं देवि दुर्भेदं त्रिदशैरपि ॥५४॥ अङ्गुल्याग्रेण संघृ
ष्य जिह्वामत्र निवेशयेत् ॥ एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं प्रविश्यति ॥५५॥ ब्रह्मद्वारे प्रविष्टे तु सम्यङ्मथनमाचरेत् ॥ म

थनेन विना केचित्साधयन्ति विचक्षणाः ॥५६॥ खेचरीमन्त्रसिद्धिः स्यात्सिद्धं तन्मथनं विना ॥ जपं च मथनं चैव कृत्वा शी
घ्रं फलं भवेत् ॥५७॥ स्वर्णजां रौप्यजां वापि लोहजां वा शलाकिकां ॥ नियोज्य नासिकारन्ध्रे दृढस्निग्धेन तन्तुना ॥५८॥
प्राणान्निरुध्य हृदये दृढमासनसंस्थितः ॥ शनैः संमथनं कार्यं भ्रूमध्ये न्यस्तचक्षुषा ॥५९॥ षण्मासान्मथनावस्था तावन्नै
व प्रजायते ॥ सम्यक्संरुद्धजीवस्य योगिनस्तन्मयो यथा ॥६०॥ सुषुप्तिर्बालकानां च बालकानां यथा भवेत् ॥ न सदा म
थनं शस्तं मासि मासि समाचरेत् ॥६१॥ सदा रसनया देवि मार्गं तु परिसंक्रमेत् ॥ एवं द्वादशवर्षैश्च संसिद्धिः परमेश्वरि ॥६२
शरीरे सकलं विश्वं पश्यत्यात्मविभेदतः ॥ ब्रह्माण्डेयं महामार्गं राजदन्तोर्ध्वमण्डले ॥६३॥ भ्रूमध्ये तं विजानीयात्त्रिकू
टं सिद्धसेवितम् ॥ चणकाङ्कुरसंकाशं तत्र संयोजयेन्मनः ॥६४॥ लिहन् रसनया तत्र स्रवन्तं परमामृतम् ॥ शनैरभ्या
समार्गस्थः चतुर्वर्षं पिबेत्प्रिये ॥६५॥ वलिपलितनाशश्च संसिद्धिर्निश्चला भवेत् ॥ सर्वशास्त्रार्थवेत्ता च जीवेद्वर्षसह
स्रकम् ॥६६॥ खनित्वाविमहावादे रसनादीनि सिद्ध्यः ॥ पीत्वापीत्वा विशेत्स्वस्त्रं व्रतस्या द्वादशात्मकम् ॥६७॥ अनेन

भ्यासयोगेन वलीपलितवर्जितः ॥ वज्रकायो महायोगी वर्षलक्षं प्रजीवति ॥६८॥ दशनागसहस्राणां बलेन सहितं प्रि
ये ॥ सूक्ष्मदर्शनश्चैव दूराच्छ्रवणमेव च ॥६९॥ निग्रहानुग्रहे शक्तः सर्वत्र बलवान् भवेत् ॥ एताश्च सिद्धयो देवि भ्रूमध्ये सं भ
वन्तिहि ॥७०॥ आकाशे रसनां कृत्वा दन्तपंक्तिं न पीडयेत् ॥ काकचंचुपदं वक्त्रे कृत्वा तदमृतं पिबेत् ॥७१॥ पानाद्व
त्सरतः सत्यं जरामरणवर्जितः ॥ खेचरत्वमवाप्नोति जीवत्याचन्द्रतारकम् ॥७२॥ पादुका खड्ग वे[illegible] सिद्धिद्रव्य मभी
प्सितम् ॥ अंजनं विवरं चैव चेटकं यक्षिणीं तथा ॥७३॥ ये केचिन्सिद्धसमयं विद्यन्ते भुवनत्रये ॥ तत्सर्वमेव सहसा सा
धयेत्साधको नमः ॥७४॥ इति श्रीमहा आदिनाथेन शक्ते महाकाल योगशास्त्रे उमामहेश्वरसंवादे प्रथमः पटलः
॥ ईश्वर उवाच ॥ यत्तज्जिह्वार्गलद्वारं दुर्विज्ञेयं महेश्वरि ॥ कलाचतुष्कं तत्रस्थं चतुर्वर्गात्मकं रसम् ॥ पूर्वभागकृतानां
मगुप्ता दक्षिणागोचरे ॥ दिवापश्चिमदिग्भागे परापर शिवोत्तरे ॥२॥ तद्द्वारं रसनाग्रेण तोसा पूर्वकलाकृतम् ॥ यदा पिब ४
ति वै योगी मासार्ध मधिपो भवेत् ॥३॥ यदा गुप्तामृतं दक्षे योगी रसनया लिहेत् ॥ मासार्धेन न संदेहः साक्षादर्थेश्वरो भवेत्

॥४॥ पश्चिमत्तु कलायां तममृतं जिह्वया पिबेत् ॥ यदा तदा महायोगी मासात्कामेश्वरो भवेत् ॥५॥ उत्तरस्य कलायाना मम्
तं च पिबेद्यदि ॥ तदासौ परमेष्ठीना माधिपत्यमवाप्नुयात् ॥६॥ तदोर्ध्वमण्डले लीनं ब्रह्मरन्ध्रं परामृतम् ॥ यदासौ पिबते
योगे जीवन्मुक्तः शिवो भवेत् ॥७॥ मासामासावधि यदा द्वादशाब्दं समाचरेत् ॥ सर्वरोगविनिर्मुक्तः सर्वसम्पूर्णलक्षणः ॥८॥
जायते शिववद्योगी लोकेस्मिन्नजरामरः ॥ चतुष्कलामृतं वारि पीत्वा पीत्वा महेश्वरि ॥९॥ ब्रह्मस्थाने स्थिता जिह्वा शनिर्यो
त्या मृतं पिबेत् ॥ सुस्वादु शीतलं हृद्यं क्षीरवर्णं सफेनिलम् ॥ १०॥ मासमात्रप्रयोगेन जायते देववत्स्वयम् ॥ द्विमासे सर्व
शास्त्रार्थसम्यग्ज्ञानातिपार्वति ॥ ११॥ स्वतन्त्रः शिववन्मासत्रयाद्भवति वै शिवे ॥ चातुर्मास्ये महेशानि सर्वज्ञत्वं प्रवर्त
ते ॥१२॥ पञ्चमासे महासिद्धिस्त्रैलोक्यमपि पश्यति ॥ षण्मासे परमानन्दो गुणसद्भावपूजितः ॥१३॥ जायते नात्र सं
देहो जीवन्मुक्तः परापरे ॥ सप्तमेन महाकायः पिशाचोरगराक्षसैः ॥१४॥ सह संवर्तते नित्यं स्वेच्छया हृष्टमानसः ॥ अ
ष्टमे मासपर्याये देवसंमीलनं भवेत् ॥ १५॥ नवमासे त्वदृश्यत्वं सूक्ष्मत्वं चैव जायते ॥ दशमे कार्यरूपत्वं सर्वलोकप्रका

खे॰ वि॰ शाकम् ॥१६॥ एकादशे त्रिकालज्ञः सर्वलोकेश्वरः प्रभुः ॥ जायते शिववद्दिद्वि न त्वमेतन्मयोदितम् ॥ १७॥ यत्र चूलितलं
५ प्रोक्तं केदारं शाहुरीश्वरी ॥ तत्र सोमकला सा च विख्याता वीरवन्दिते ॥ १८॥ अमृता प्रथमा देवि द्वितीया मानवाह्वया ॥ पु
ष्टिश्चाद्य चतुष्टिश्च रतिश्चैव धृतिस्तथा ॥ १९॥ सान्मी नित्या चाष्टमी सर्वाः परामृतरसार्णवाः ॥ तद्वामाभिमुखं जिह्वाग्रदायो
गीकरोति च ॥२०॥ अष्टधाप्लवनेनात्र तदा तु ह्निनसंततिम् ॥ तदाप्लवनसंयोगे कल्लेवरगदक्षयः ॥२१॥ अष्टभिर्मासव
र्गोहैः खेचरत्वं प्रजायते ॥ भ्रूमध्ये पूर्वभया प्रोक्तं तत्प्रभो सोममण्डलम् ॥ २२॥ कलाचतुष्कं तत्रोक्तं परामृतनिकेतनम् ॥
चण्डिका नवकान्तिश्च ज्योत्स्ना श्रीश्चेति नामतः ॥२३॥ तत्र जिह्वा समावेश्य पिबपीत्वा समाविशेत् ॥ देवि मासचतुष्केण जा
येन निरुपद्रवः ॥ २४॥ वज्रकायो भवेत्सत्यं सदा पावनपावनः ॥ तदूर्ध्वं वज्रकं दाख्यं शिलारसेन्दुमण्डलम् ॥ २५॥ ललाटा
न्तं विजानीयात्तत्र देवकलात्रयम् ॥ प्रीतिस्तथाङ्गजा पुरायात्र जिह्वां प्रवेशयेत् ॥ २६॥ क्षीरधारामृतं शीतं स्रवन्तं जिह्वया
पिबेत् ॥ मासत्रयेण देवेशि सर्वव्याधिविवर्जितः ॥ २७॥ अभेद्यः सर्वशस्त्रौघैरभेद्यः सर्वलोककैः ॥ अचिन्त्यः सर्वविज्ञाने ८ ५

विरूपविषयान्वितैः ॥२८॥ भैरवाभो भवेत्सत्यं वज्रकन्दप्रभावतः ॥ नासिकाधात्तरोष्ठोर्ध्वो राजदन्तं महापदः ॥२९॥ तत्रपू
र्णा महं देवि शीतलं च कलाद्वयम् ॥ पूर्णा पिकुम्भकावस्था रसनाग्रेण संस्पृशेत् ॥ ३०॥ तत्र संजायते सत्यं सुखदं शीतलं ज
लम् ॥ सुमनस्तत्र संयोज्य पिबेन्मासचतुष्टयम् ॥ ३१॥ अजरामरतामेति सर्वव्याधिविवर्जितः ॥ गुदबीजाङ्कुरस्थानमाधारं
परिकीर्तितम् ॥ ३२॥ तत्र पञ्चकला प्रोक्ता प्रगलत्परमामृताः ॥ सुधा सुधामयी प्रज्ञा कालघ्नी ज्ञानदायिनी ॥ ३३॥ कलाप
ञ्चसधाराच कीर्तिता सर्वसिद्धिदा ॥ तत्रस्था परमा शक्तिरक्षा कुण्डलिनी सिता ॥ ३४॥ तत्राकुञ्चनयोगेन कुम्भकान्निसुरा
र्चिते ॥ स्थूलशक्त्या समासाद्य तत्रस्थं शीतलामृतम् ॥ ३५॥ सुषुम्णायां समासीनस्वाधिष्ठानादिपङ्कजात् ॥ तत्सुधारससं
सिक्तं स्मरेद्ब्रह्माण्डकार्यधीः ॥ ३६॥ तत्रस्थानेमृतं गुह्यं शक्तिश्रीकुण्डलीपरा ॥ सुषुम्णामार्गमासाद्य ब्रह्मधामन्तमायुधीः
॥३७॥ मूलपर्वकला याता सुधातृप्तिपरिप्लुता ॥ आपादतलपर्यन्तं व्यापयन्तीं तनुं स्मरेत् ॥ ३८॥ सुषुम्णा परमा ह्लादवि
धायेति प्रकीर्तिता ॥ पूर्ववत्कुम्भकावस्था प्राप्य शक्तिं प्रबोधयन्च ॥३९॥ नीत्वा ब्रह्माण्डपर्यन्तं प्लावयेच्च स्वकां तनुम् ॥ योगी

खे· वि· त्रिमासपर्याये पूर्वोक्तं लभते फलम् ॥ ४० ॥ गुह्यमेकान्तरं यद्वै वेणुदण्डं तदुच्यते ॥ कलानां च तुष्कं तत्प्रोक्तं परामृतरसात्मकम्
६ ॥४१॥ सुशीता च परा तृप्तिः पलितघ्नी वलिक्षया ॥ तत्र शक्तिं तु मद्वाध्य पूर्ववत्प्लावयेत्तनुम् ॥४२॥ चतुर्मासप्रयोगेन पूर्वोदित
फलं लभेत् ॥ पिङ्गलाख्ये विवाहस्यादिडाख्या चण्डवाहिनी ॥४३॥ विषवाहस्तु विवाहः सुधावाहो निशाकरे ॥ अभ्यासः सूर्य
वाहाख्ये चन्द्रवाहे च शस्यते ॥४४॥ नासा चन्द्रवाहे च योगी कुम्भकमाचरेत् ॥ शशिवाहेन पवनं पूरयेदात्मनस्तनुम् ॥४५॥
रविवाहे न चोत्सर्गः शस्यते देहवृद्धये ॥ एतत्ते व्याकृतं देवि कलास्थानचतुर्गुणम् ॥४६॥ अतः परं प्रवक्ष्यामि परामृतमहाप
थम् ॥ वज्रकन्दं ललाटे च प्रज्वलच्चन्द्रसन्निभम् ॥ ४७ ॥ त्रीगलं च तुरस्रं च तावदेव परः शिवः ॥ देवताः समुपासन्ते योगिन्याः
शक्तिसंयुताः ॥४८॥ चूलीतले महादेवि लक्षसूर्यसमप्रभम् ॥ त्रिकोणमण्डलं मध्ये देवं लिङ्गात्मकं शिवम् ॥४९॥ रंगर्भप
रमं देवि स्वशक्त्यालिङ्गितं परम् ॥ देवतागणसंयुक्तं भावयेत्परमेश्वरि ॥ ५० ॥ दक्षशाखे महाभागे षड्बिन्दुवलयान्विते ॥ यं ६
गर्भं धूम्रवर्णाभं तत्र देवो महेश्वरः ॥५१॥ लिङ्गाकारं स्मरेद्देवि शिवयुक्तं गणान्वितम् ॥ वामशाखेऽर्धचन्द्राभं सपद्मं मण्डलं

शिवे ॥५२॥ वंगर्भं च तद्वत्तं मध्ये तत्र लिङ्गं सुधामयम् ॥ गोक्षीरधवलाकारं शरच्चन्द्रयुतप्रभम् ॥५३॥ स्वशक्तिसहितं सर्वदेवत
गणासेवितम् ॥ एवं देवि चतुर्दिक्षु स्थानान्युक्तानि वै मया ॥ ५४ ॥ तेषां मध्ये महावृत्तं हंगर्भं तच्च पार्वति ॥ परेश्वरः परः शम्भुः
स्वसितशक्तिसंस्थितः ॥५५॥ लिङ्गाकारो गुणैर्युक्तः सूर्यकोटिसमप्रभः ॥ पृथिव्याधिपतेर्भाले पश्चिमे सूर्यनायकः ॥ ५६ ॥ दक्ष
शाखे निलपतिर्वामे जलपतिः शिवः ॥ मध्ये व्योमपतिः स्थानेष्वेते पञ्च मयोदिताः ॥५७॥ व्योमाधिपस्य देवस्य शीर्षे च तुरङ्कु
ले ॥ ज्योतिर्मण्डलमध्यस्थं कोटिचन्द्रसमप्रभम् ॥५८॥ दिव्यामृतमयं भाण्डं मूल[illegible]कपाटकम् ॥ चन्द्रमहाशैलसभे
घसमृतं परम् ॥५९॥ शीतलामृतमध्ये तु विलीनं लिङ्गमीश्वरि ॥ चसेरणुप्रतीकाशं कोटिचन्द्रसमप्रभम् ॥ ६० ॥ हेयोपादेयर
हितं सज्ञानं तिमिरापहम् ॥ अभीर्थैश्च शून्यानि परं तत्त्वे पिलभ्यते ॥ ६१ ॥ परामृतघटाधारकपालकुम्भकान्वितम् ॥ मनः
सा सह वागीशीमूर्ध्ववक्त्रां प्रसारयेत् ॥६२॥ निरुद्धप्राणसंचारो योगी रसनयार्गलम् ॥ लीलया द्वाटयेत्तत्यं संप्राप्य मनसा
सह ॥ ६३ ॥ शीतिसुरससुस्वादं तत्क्षीरममृतं परम् ॥ योगपानं पिबेद्योगी दुर्लभं विबुधेरपि ॥६४॥ तत्सुधातृप्तिसंतृप्तो परा

वस्थामुपेत्य च ॥ तन्मयं नेत्रसंयोगं लब्ध्वा ब्रह्माण्डकानने ॥ ६५ ॥ नादबिन्दुमयं मांसे योगी योगेन भक्षयेत् ॥ एतद्रहस्यं देवे
शि दुर्लभं परिकीर्तितम् ॥ ६६ ॥ सर्वज्ञेन शिवेनोक्तं सफलं शास्त्रसन्ततौ ॥ तत्सर्वं लभ्यते सत्यं यशमासान्नात्र संशयः ॥ ६७ ॥
संप्राप्य सिद्धिसंपानं योयोग मिमममीश्वरि ॥ नवेत्ति तस्य वक्तव्यं न च सिद्धिं नियच्छसि ॥ ६८ ॥ तज्जानन्ति गुरुं देव शास्त्रोक्तं स
मयास्तथा ॥ दम्भकौटिल्यनिरतास्तेषां शास्त्रं न दापयेत् ॥ ६९ ॥ जिह्वामूले स्थितां देवी सर्वतेजोमयोऽनलः ॥ तं चन्द्रगत्ति
तं देवि शिवलिङ्गमयामृतम् ॥ ७० ॥ तदग्ने भास्करश्चन्द्रस्तालुमध्ये प्रतिष्ठितः ॥ एवं यो वेत्ति तत्त्वेन तस्य सिद्धिः प्रजायते ॥ ७१
मथित्वा मण्डलं वह्नेः समुद्भूतः प्रयत्नतः ॥ तदुद्भवं चन्द्रद्रवीभूतं तज्जलं चन्द्रमण्डले ॥ ७२ ॥ भास्कराधिष्ठिताग्रेण रसनेत्र:
समाश्रयेत् ॥ तं चन्द्रगत्ति तं देवि शीतलं परमामृतम् ॥ ७३ ॥ नासिकारन्ध्रनिर्यातं पात्रे च परिसंग्रहेत् ॥ तेनाङ्गमर्दनात्सत्यं ना
डीशुद्धिः प्रजायते ॥ ७४ ॥ गुदलिङ्गाद्भुतं पात्रे निर्मथ्या सशरीरकम् ॥ कस्यामृतं च संलोड्य ससत्यं चाधारसः ॥ ७५ ॥ तेनाङ्गम
र्दनं कृत्वा योगी लोके निरामयम् ॥ वलीवान्जायते सत्यं वलीपलितवर्जितः ॥ ७६ ॥ जिह्वामूलं च संमर्धन तत्र जातं महाद्रवम् ॥

स्वदेहं मर्दयेत्पूर्वं रसेन बक्षरावनः ॥ ७७ ॥ चतुरङ्गुलवृद्ध्या च जायते नात्र संशयः ॥ उत्कृष्य रसनादूर्ध्वं दक्षिणाङ्गुलिभिः शि
वे ॥ ७८ ॥ वामहस्ताङ्गुलीभिश्च घटिकां स्फोटयेच्छिवे ॥ मथित्वा पावकस्थानमूर्ध्वं वक्त्रं शनैः शनैः ॥ ७९ ॥ त्रिकूटोर्ध्वो र्ध्वचक्रां
शे शिवस्थानं समाश्रयेत् ॥ एषा ते खेचरीमुद्रा कथिता मृत्युनाशिनी ॥ ८० ॥ एवमभ्यासशीलस्य तद्विघ्नार्थं भवन्ति हि ॥ हठभे
दाश्च चत्वारो नटभेदास्तथैव च ॥ ८१ ॥ अङ्कशोषश्च सुधालस्यं कण्डूदेह विवर्णता ॥ नटस्य प्रत्ययो ह्येते तेषां शृणुष्व भेषजम्
॥ ८२ ॥ मनो निर्विषयं कृत्वा त्रिमासं ममरीरसैः ॥ देहमुद्वर्तयेत्तेन देहवृद्धिः प्रजायते ॥ ८३ ॥ निरुद्वर्तनकं कुर्याद्दिवारात्रौ
तथैव च ॥ रसमुद्वर्तमायोज्य वृक्षस्कन्दपदोन्मुखी ॥ ८४ ॥ तत्सुधालिहनसत्यं सुधालस्यं च नश्यति ॥ तत्सुधामसरी
चाथ गृहीत्वा चाङ्गमर्दनम् ॥ ८५ ॥ स्वशरीरविवर्णत्वं कण्डूश्चापि प्रणश्यति ॥ नटभेदाश्च चत्वारो बहुधा शोसिता प्रिये
॥ ८६ ॥ नेत्ररोगाङ्गशोथश्च दाहो भ्रान्तिस्तथैव च ॥ भेदमेकं तथा प्रोक्तं द्वितीयमधुना शृणु ॥ ८७ ॥ दन्तरुक्कलशत्वं च दे
हलायचनाशनम् ॥ तृतीयभेदं च तथा शृणु देवि महाज्वरः ॥ ८८ ॥ शिरोरुजः श्लेष्मदोष चतुर्थं संप्रधायताम् ॥ वमनं

खे वि. श्वासदोषश्च नेत्रान्धत्वं प्रजायते ॥८९॥ दुर्जयाच तथा निद्रा तेषां शृणु च भेषजम् ॥ समूलो द्वासं भिन्नामूर्ध्वकुराडलि
८ नीं नयेत् ॥९०॥ निश्चलामूर्ध्वगां कृत्वा भूत्वा कुम्भकमाश्रयेत् ॥ शक्तिक्षोभान्महेशानि महानादप्रवर्त्तने ॥९१॥ यदा
शृणोति तं नादं तदा मुक्तः स उच्यते ॥ चिन्तयेदमृताशक्तिं स्वदेहे परमेश्वरि ॥९२॥ अनेन देवि मासेन पूर्वदोषैः प्रमु
च्यते ॥ अनेनैव विधानेन द्विमासं तु यदाचरेत् ॥९३॥ तदा शृणोति कर्णाभ्यां महागजरवध्वनिम् ॥ पूर्ववच्चिन्तयेत्
देहे द्वितीयामुच्यते गदैः ॥९४॥ त्रिमास ब्रह्मनादश्च शृणुयात्पूर्ववत्स्मरेत् ॥ तृतीयभेद दोषैश्च मुच्यते नात्र संशयः ॥
९५॥ मेघनादमयूराख्यं चतुर्थे मासि श्रूयते ॥ श्रुत्वा पूर्ववदभ्यासभ्रान्ति दोषैः प्रमुच्यते ॥९६॥ एवं स्थिरमतिर्ध्यानमभ्या
स्य चित्रकालिकः ॥ साधयेत्पञ्चमासन्तं जायते ह्यजरामरः ॥९७॥ नट भेदेश्च तुष्कस्य नटभेदश्च जायते ॥ निवारणं मया
प्रोक्तं भूयः शृणु सुराधिपे ॥९८॥ याश्मन शान्तिपतित्वायोगी योगेश्वरात्मके ॥ प्रविशः सर्वतत्त्वज्ञः तस्य पादोनमाम्यहम् ८
॥९९॥ प्रथमं चालनं देवि द्वितीयं मथनं भवेत् ॥ तृतीयं पीतमुद्दिष्टं चतुर्थं तत्र्व वेशनम् ॥१०० तालुमूलं समुद्धृष्य जि

ह्वामुत्कर्षयेत्प्रिये ॥ चालनं तद्विजानीयाच्चिमार्गार्गलभेदनम् ॥१॥ भेदनं तं वदन्तीस्म मथनं तन्नुता प्रिये ॥ लोहकीलि
प्रवेशेनं मथामथनमाचरेत् ॥२॥ मथनन्तं विजानीया योगी सिद्धिकरं भवेत् ॥ उद्घाट्यार्गलमाकाशे जिह्वामूलं प्रसारयेत् ॥
३॥ प्रवेशं तं हरेशानि योगसिद्धिप्रवर्त्तकम् ॥ ब्रह्मार्गलप्रवेशेन जिह्वासंक्रमणेन च ॥४॥ प्रत्यय परमेशानि क्षणात्सत्यं प्र
जायते ॥ आदावानंदभावेत्वं निद्राहारे ततः परम् ॥५॥ संगमभोजनं देवि स्वल्पमात्रं प्रजायते ॥ पुष्टिः संजायते तेजो देहवृद्धिर्भ
वेत्प्रिये ॥६॥ न जरा न च मृत्युश्च न व्याधिः पलितानि च ॥ ऊर्द्धरेता महेशानि अणिमादिसमन्वितः ॥७॥ यदि तच्चलभावे
न योगमितत्त्व साधयेत् ॥ यदा प्रोक्तानि मान्तस्स्पलभेतकाम पार्वती ॥८॥ जिह्वाग्रे श्रीश्चवागीशी संस्थिता वीरवन्दिते ॥ जि
ह्वामूलाधारभागे बन्धमृत्युप्रतिष्ठिता ॥९॥ बन्धुमृत्युप्रदं सर्वमूलं मूलगुणाङ्कितः ॥ तदग्रेणा विशेत्सोम धाम श्रीसंभुसंज्ञिक
म् ॥१०॥ अनेन देवि योगेन मनसा साधितेन च ॥ उन्मनीवशमायाति योगीतल्लयमाप्नुयात् ॥११॥ लयनात्प्राप्यथः स
घः संपिबेच्च विचारतः ॥ जिह्वाग्रे मनसा ध्यायन्दशाधातमलक्षयेत् ॥१२॥ मूलात्सुषुम्णा मार्गेण पवनं चोर्द्धं चालयेत् ॥

ब्रह्मध्यानगते योगी मनः शून्ये निवेशयेत् ॥१३॥ ध्यायेद्देवि परं तत्त्वं ह्येयोपादेयवर्जितम् ॥ आकाशगङ्गास्रवनि ब्रह्मस्थानात्सुशी
तलम् ॥१४॥ यः पिबेन्मासमेकेन वज्रकायो भवेद्ध्रुवम् ॥ दिव्यदेहो भवेत्सत्यं दिव्यकायावदर्शनम् ॥१५॥ दिव्यबुद्धिर्भवेत्सत्यं दि
व्यश्रवणमेव च ॥ जिह्वाग्रे कोटिचन्द्राभां वागीश्रीं प्रति भावयेत् ॥१६॥ पीतामृतकलातृप्तां कवित्वं लभते क्षणात् ॥ जिह्वाग्रसं
स्थितां लक्ष्मीं परामृतविमोदिताम् ॥१७॥ ध्यायन्योगी महेशानि योगसाम्राज्यमाप्नुयात् ॥ सहजाः पञ्च विख्याताः पिण्डे स्थिरमं
तिके ॥१८॥ यदा संजायते देहो मातृदेहे पितृक्षयात् ॥ न नम्याधर्भवन्तिस्मदेहवृद्धिमुपेयुषि ॥१९॥ आद्यः कुण्डलिनी
शक्तिः सहजा प्रथमा स्मृता ॥ द्वितीयानुसुषुम्नास्यात्सिद्धा चैव तृतीयका ॥२०॥ तालुस्थानं चतुर्थं स्याद्ब्रह्मस्थैव तु पञ्चमम् ॥
तन्निर्द्दिष्टं सहजामाद्यां द्वितीये सहजे न्यसेत् ॥२१॥ तृतीयां सहजामूर्ध्वे चतुर्थे सहजे विशेत् ॥ चतुर्थसहजं भित्त्वा सहजं पञ्चमं
विशेत् ॥२२॥ एतद्द्वंद्वं मया प्रोक्तं दुर्विज्ञेयं कुलेश्वरि ॥ गोपनीया प्रयत्नेन न देवा यस्य कस्यचित् ॥१२३॥ इति श्रीमहाआ
दिनाथेन प्रोक्ते महाकालयोगशास्त्रे उमामहेश्वरसम्वादे खेचर्यां विद्यायां द्वितीयः पटलः २ मूलकुण्डलिनीशक्तिं ९

सुषुम्नामार्गमागताम् ॥ त्रुटितेक ततु प्रतिमां सूर्यकोटिसमप्रभाम् ॥१॥ प्रविश्य घटिका मार्गे शिवद्वारां गत्वा शिवम् ॥ भीत्वार
स तथा योगी कुंभकेन महेश्वरि ॥२॥ प्रविशेत्कोटिसूर्याभां धाम स्वयं भुवि प्रिये ॥ तत्रामृतमहाम्भोदौ शिवकल्लोलमालिनी
॥३॥ पीत्वा विश्रम्य च स्वधा परमानन्दपूर्णया ॥ वुद्धा तत्त्व धयारस्य मात्मदेहं सुभावयेत् ॥४॥ अनेन दिव्ययोगेन जाय
ते दिव्यदर्शनः ॥ खेचरत्वं भवेत्सत्यं सर्वरोगक्षयस्तथा ॥५॥ वंचनं कालमृत्यूनां त्रैलोक्यभ्रमणं तथा ॥ अणिमादिगुणोपेतः
संसिद्धो जायते ध्रुवम् ॥६॥ योगेन्द्र तत्त्वमाप्नोति मपरव्याहता भवेत् ॥ नवनागसहस्राणां बलेन सहितः स्वयम् ॥७॥ जायते
शिवपदेऽपि सत्यं सत्यं मयोदितम् ॥ इडापिङ्गलयोर्मध्ये सुषुम्ना ज्योतिरूपिणी ॥८॥ वर्णरूपगुणैः पूर्णास्तिवस्त्रनिरालय
म् ॥ प्रसुप्तभुजगाकाराया सा कुण्डलिनी परा ॥९॥ गङ्गा च यमुना चैव इडापिङ्गलसंज्ञिका ॥ गङ्गायमुनयोर्मध्ये तां शक्तिं
संनिवेशयेत् ॥१०॥ ब्रह्मधामावधिं शिवपरमामृतरूपिणी ॥११ तन्मध्ये जायते सत्यं सदामृततनुः स्वयम् ॥११॥ शिवधाम
गता शक्तिः परमे शान्त्यदं परम् ॥ तद्योगात्प्रसनृप्तापरमानन्दपूरिता ॥१२॥ संचिन्त्य योगिनो देहमापादतलमस्तकम्

खे. वि. अथ सा शशिरश्मिस्था शीतला परमेश्वरी ॥ १३ ॥ पुनस्तेनैव मार्गेण पूजा ति स्वयं प्रिये ॥ एतद्रहस्यमाख्यातं योगे यो
१० गेन्द्रवन्दितान् ॥ १४ ॥ उत्सृज्य सर्वशास्त्राणि जपहोमादिकर्म च ॥ धर्माधर्मविनिर्मुक्तो योगी योगं समभ्यसेत् ॥ १५ ॥ र
सनामूर्ध्वगां कृत्वा त्रिकूटे संनिवेशयेत् ॥ ब्रह्माण्डब्रह्मरन्ध्रे स्वायां राजदन्तोर्ध्वमण्डले ॥ १६ ॥ त्रिकूटं तं विजानीयात्त्रिलिङ्गं
सममुज्ज्वलं ॥ कालकर्मविनिर्मुक्तो दुर्विज्ञेयं सुरैरपि ॥ १७ ॥ इडा यां रात्रिरुद्दिष्टा पिंगलायामहः स्मृतम् ॥ चन्द्रादित्यौ स्थि
तौ देवि नित्यं रात्रिदिवात्मकौ ॥ १८ ॥ न दिवा पूजयेल्लिङ्गं रात्रौ चैव न पूजयेत् ॥ सततं पूजयेल्लिङ्गं दिवारात्रिनिरोधतः ॥ १९
अहोरात्रिमयं देवं कालकर्मस्वभावजम् ॥ कालकर्मनिरोधेन कालमृत्युर्यथा भवेत् ॥ २० ॥ कालधर्मविनिर्मुक्तो चिन्तयेद्दात्म
नस्तनुम् ॥ पूजयेद्भावपुष्पेण तर्पयेत्तं कलामृतम् ॥ २१ ॥ एवं यस्माससयोगेन जायते ह्यजरामरः ॥ सर्वज्ञत्वं भवेन्नित्यं शिववत्स स
निरामयः ॥ २२ ॥ तालुमूले समावेश्य रसनामूर्ध्वचक्रगा ॥ तत्र यातां सुधां पीत्वा सीत्कारेण शनैः शनैः ॥ २३ ॥ प्रपिबेत्तं १०
च सं योगी निरालम्बपदे शिवे ॥ मनः संयोज्य योनान्या सहजं योगमाचरेत् ॥ २४ ॥ अनेन योगेषण्मासे जायते ह्यजरामरः

चिबुकं च जपेद्देवि षोडशस्वरमण्डलम् ॥ २५ ॥ भ्रूमध्ये चक्षुषी न्यस्य जिह्वामूर्ध्वं प्रसारयेत् ॥ संप्राप्य कुंभकावस्था मिं
डापिङ्गलरोधनम् ॥ २६ ॥ मूलशक्तिं समुद्धाप्य नीत्वा षट् सरसीरुहात् ॥ तडित्सहस्रसंकाशां ब्रह्माण्डोदरमध्यगाम् ॥ २७ ॥
ध्यानी शीतामृतांभोधौ संनिवेश्य चिरं विशेत् ॥ यदा ब्रह्ममये धाम्नि योगः सर्वत्र लीलया ॥ २८ ॥ यदा निर्जीववद्देहो भा
निस्फुरति तत्पदम् ॥ अनेन देवयोगेन सप्तसप्तकमाचरेत् ॥ २९ ॥ यदा तदा संभवति जरामरणवर्जितः ॥ मासत्रयप्रयोगेन जी
वेदाचन्द्रतारकम् ॥ ३० ॥ यदा ब्रह्मपुरं भित्त्वा योगं व्रजति लीलया ॥ तदा शिवत्वमाप्नोति नित्यं देहमिमं शिवे ॥ ३१ ॥ न पुनः पि
बति मातुः स्तनं तो संसारचक्रके ॥ यदा तु वा घनो वृद्धिस्त्यक्ते देहमिमं भवेत् ॥ ३२ ॥ तदा स्थिरशान्तो भूत्वा मूलाच्छक्तिं समुज्ज्वलां ॥
कोटिसूर्यप्रतीकाशं भावयेच्चिरमात्मवित् ॥ ३३ ॥ आपादतलपर्यन्तं प्रसृतं जीवमात्मनि ॥ संहृत्य क्रमयोगेन मूलाधारपदं
नयेत् ॥ ३४ ॥ तत्र कुण्डलिनीशक्तिः सर्वत्रानिलसंनिभम् ॥ जित्वा निलं चेन्द्रियाणि ग्रसन्तं चिन्तयेद्धिया ॥ ३५ ॥ संप्राप्य कुंभका
वस्था तया द्वलय भासुरम् ॥ मूलमुत्तीर्य देवेशि स्वाधिष्ठानपदं नयेत् ॥ ३६ ॥ तत्रस्थं जीवमखिलं ग्रसन्तीं चिन्तयेद्धितम् ॥ त

खे॰ वि॰ डिन्कोटिप्रतीकाशं तस्मादंतियमन्वसम्॥३७॥मणिपूरपदंप्राप्य तत्र पूर्ववदाचरेत्॥समुत्तीर्य पुनस्तस्मादनाहतपदं नये
अथ त्॥३८॥तत्रस्थित्वाक्षरो देवि पूर्ववर्गस्ततां स्मरेत्॥तन्त्रादयस्पुनः पादौ षोडशारे निवेशयेत्॥३९॥तत्रापि चिन्तयेद्देवि
पूर्ववद्योगमार्गवित्॥तस्मात्तृतीयभ्रूमध्यं नीत्वा जीवं ग्रसेत्पुनः॥४०॥ग्रस्तं जीवं महेशानि कोटिसूर्यसमप्रभम्॥मनसा स
हवागीशं नीत्वा ब्रह्मार्गलं क्षणात्॥४१॥परामृतमहाम्भोधौ विश्रामं सम्यगाचरेत्॥तत्रस्थं परमं देवि शिवं परमकारणम्
॥४२॥शक्त्या सह समायोज्य तयोरैक्यं विभावयेत्॥यदिदं विसमुद्युक्तः कालं कालविभागवित्॥४३॥यावदिच्छति तत्का
लं तावत्तत्सुखं वसेत्॥तस्मादूर्ध्वपदं देवि न हि कालप्रयोजनम्॥४४॥ब्रह्मद्वारार्गलस्याधो देहस्य स्प्रयोजनम्॥य
दि देव्यात्मनः कालमतिक्रान्तं प्रपश्यति॥४५॥तदा ब्रह्मार्गलं भित्त्वा शक्तिमूलपदं नयेत्॥शक्तिदेहप्रसुप्तं च स्वजीवं चे
न्द्रियैः सह॥४६॥ततोक्तिमूलपदं नयेच्छक्तिदेहस्य प्रसुप्तम्॥स्वजीवं चेन्द्रियैः सह तत्र कालक्रमागतः॥४७॥यदि मानुष्यकं
देहं त्यक्तुमिच्छा प्रवर्तते॥ततः परमसन्तुष्टो ब्रह्मस्थाने परे शिवे॥४८॥शक्त्या संयोज्य निर्भिद्य योगब्रह्मशिवं व्रजेत्॥व्यो ११

मतत्त्वं महाव्योम्नि वायुतत्त्वं महानिले॥४९॥तेजस्तत्त्वं महातेजो यस्पत्त्वं जलमण्डले॥महीतत्त्वं महाभोगे निशालं वे मनः
परम्॥५०॥व्योमादिगुणतत्त्वेषु चेन्द्रियाणि निवेशयेत्॥एवं संसारकं त्यक्त्वा परं तत्त्वविलंबकः॥५१॥अहष्टपञ्चभू
तानि भित्त्वा सूर्यस्य मण्डलं॥परं तत्त्वपदे शान्ते शिवे लीनः शिवायते॥५२॥न कोटिकल्पसाहस्रैः पुनः संवर्तनं भवेत्॥
अनुग्रहाल्लोकानां यदि देहं न संत्यजेत्॥५३॥प्रलयान्ते तनुं त्यक्त्वा आत्मन्येवावतिष्ठते॥इत्येवं खेचरी मुद्रा खेचराधि
पतिस्तथा॥५४॥जन्ममृत्युजरारोगावलीपलितनाशिनी॥अनया सदृशी विद्या क्वचिच्छास्त्रान्तरे न हि॥५५॥खेचरी
मेलनं देवि सुगुह्यं तत्प्रकाशितम्॥खेचर्या न समा देवि सर्वयोगेन्द्रवन्दिते॥५६॥तां न यो वेत्ति लोकेस्मिन्स पशुः प्रोच्यते
शिवे॥नित्यमभ्यासशीलस्य अतोपि जगत्त्रये॥५७॥गुरुवक्त्रात्समालभ्य विद्यया भ्यासतोपि वा॥खेचरीमीलकाद्ये
स्तु निःसंसक्तचेतसः॥५८॥न सिद्ध्यति महायोगी मदीयाराधनं विना॥मत्प्रसादविहीनानां मन्निन्दापरचेतसाम्॥५९
पशूनां पाशबद्धानां योगः क्लेशाय जायते॥५९॥सर्वज्ञेन शिवेनोक्तं पूजां संत्यज्य मामकीम्॥६०॥पूजितः सततं देवि योगो

नाशाय जायते ॥ भक्त्या संजायते देवि सर्वलोकमयं शिवम् ॥ ६१ ॥ मद्ध्यानाशक्तचित्तस्य तुष्यन्ति सर्वदेवताः ॥ तस्मात्संपू॰
ज्य संपूज्य मत्प्रसादेन खेचरीम् ॥ ६२ ॥ अन्यथा क्लेशभागी स्यात् न सिद्धिर्जन्मकोटिभिः ॥ सर्वे सिद्धान्ति मन्त्राश्च योगाश्च प
रमेश्वरि ॥ ६३ ॥ मदाराधनशीलस्य मद्ध्यानाशक्तचेतसः ॥ तस्मात्संपूजयेद्देवि सर्वयोगाभिवृद्धये ॥ ६४ ॥ खेचर्यानन्दितो यो
मास्वाद स्वगुरूत्प्रकाशितः ॥ ६५ ॥ सर्वसाधनसंयुक्तः सर्वचिन्ताविवर्जितः ॥ रुद्रासनं स॰
मास्थाय स्वगुरूत्प्रकाशितः ॥ ६६ ॥ कुर्यादेकैकमभ्यासं गुरुमार्गावलम्बकः ॥ नवप्रीत्यामहेशानि किं भूयः श्रोतुमिच्छसि ॥
६७ ॥ श्रीदेव्युवाच ॥ शंभो सद्भक्तिसंलभ्य जयं चन्द्रक खेचरी ॥ त्वया श्री खेचरी विद्या गुह्या साच निरूपिता ॥ ६८ ॥ इति
श्रीमहा आदिनाथेन निरूपिते महाकालयोगशास्त्रे उमामहेश्वरसम्वादे खेचरीविद्यायां तृतीयः पटलः ॥ ३ ॥ अथातः सं
प्रवक्ष्यामि सुदिव्यान्यौषधानि च ॥ औषधेन विना योगी न कश्चित्सिद्धिमेष्यति ॥ १ ॥ साक्षात्तमद्भुपरिकल्पितनामधेया
नन्यपत्रपुष्पफलमूलसमूलपूर्णाम् ॥ तिक्तारनालपयसा मधुशर्कराज्यैर्यादृक्क चिक्रमगवं रसमराडलानि ॥ २ ॥ पा॰ १२

लिप्यहानिमनिशं च मुदारवीर्यमुत्साहरोगगहनानि च सर्वमेव ॥ ३ ॥ कर्णावराहेण घनेन वात्मानस्वाश्च दन्ताश्च पुनर्भवे
युः ॥ युवा महामारुतसाम्यवेगो जीवेनयावद्धरणीन्दुताराः ॥ ४ ॥ वाराही स्कन्दचूर्णं घृतगुडसहितं भक्षयेद्दक्षगन्धा ॥ ति
लमाषशर्करास्व सर्पिध्यानं षण्मासमात्र प्रयोगेन नरः परमपदं लभेत् ॥ ५ ॥ पञ्चभिः पंच मासेन प्राप्यते मर्त्यतां प्रिये
गन्धकं त्रिफला कुष्ठं मधुरत्रयमेलिनम् ॥ ६ ॥ भक्षयेत्प्रातरुत्थाय षण्मासान्यालितादुलिनी ॥ पारदं गन्धकं देवि नाल
कं च मनःशिला ॥ ७ ॥ कनिष्ठिकाय स्त्रियो मद्राक्षं मद्दकारजाः ॥ त्रिमधुप्लुतमामाद्य वत्सरात्खेचरो भवेत् ॥ ८ ॥ भृङ्गस
मूलं परिशोध्य चूर्णीकृत्वं तिलं चामलकं दधि च ॥ मधुत्रयैः स्वाघनेनात्तमानि व्याधी परोगान जरा नमृत्युः ॥ ९ ॥ निर्गुण्ठी
पत्रमेकैकं त्रिकालं परिभक्षयेत् ॥ द्वादशाब्दाद्भवेद्देवि जरामरणवर्जितः ॥ १० ॥ निर्गुण्ठ्यानल निर्मुण्डी साम्यं संसाधयेद्दूर्जः
शर्करा घृतमध्वं केवलं सरायलिता पहम् ॥ ११ ॥ षण्मासं गंधकं स्वर्णं तिलकं रुद्रलोचनम् ॥ मधुरत्रययुक्तं चूर्णमजरामर
पदप्रदम् ॥ १२ ॥ रसशाल्मलिनिर्यासगन्धकं मधुरत्रयैः ॥ भक्षयेत्प्रातरुत्थाय षण्मासादजरामरः ॥ १३ ॥ इति श्री महा

खे. वि. आदिनाथेननिरूपिते महाकालयोगशास्त्रे खेचर्याविद्यायां मौषधयोगोनामचतुर्थपटल ४ ॥ ईश्वरउवाच ॥ श्रीः
खेचरीसमर्पणा सनुखेचरीमन्त्रग्रन्थोक्त सोमेमातुं वसंवर्णामित्यादि ॥ गमनसफलं षडाक्षरं खेचरीविजम् ॥ ह्रींकार
१३ खेचरीपटलेप.

१२

श्रीराष्ट्रिय अभिलेखालय
नेपाल

विषयः शैव तन्त्रम्
पुस्तक नामः महाकालयोगशास्त्रम्
क. सं. प ६५६८
वि. सं. १०२५ख
पत्र संः १३
आकार ३२×१३ से. मि.

NATONAL ARCHIVES
NEPAL

Subject:
Manuscript-Name:
C. No.
S. No.
Folio. No
Size.

Short Title Mahākālayogaśāstra

NEPAL-GERMAN MANUSCRIPT PRESERVATION PROJECT
National Archives, Kathmandu, Nepal.

Manuscript No. 5-6568 विषय नं. Śaivatantra 1025 kh

Catalogue (बृहत्[60] संक्षिप्त सूचिपत्रम्) vol. No.

TITLE:

Mahākālayogaśāstra

No. of leaves: 13 Size in cm: 32×13 Reel No. A 207/9

Date of filming: 14.11.71

Remarks: paper, devanāg.

समाप्त
END